**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**प्रवेशपरीक्षा – प्रथमपत्रिका**

**दिनाङ्क:- ३०.८.२०२०** **पूर्वाह्ण: १०.००त: १.०० पर्यन्तम्**

**समय:- होरात्रयम्** **अङ्का: - १००**

**सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:**

1. **अष्टानाम् एकवाक्येन उत्तरं लिखत।** **8**

१. कस्य पाण्ड्यराजस्य शासनसमये हर: समदृश्यत ?

२. क: जनपद: वसुधारेति विप्रै: अगृह्यत ?

३. पञ्च पञ्च राजतानि पुण्डरीकाणि केन प्रेषितानि ?

४. बाणभट्टविषये प्रसिद्धा लोकोक्ति: का ?

५. देवव्रतस्य गुरु: क: ?

६. शुकनास: कस्य मन्त्री आसीत् ?

७. अविनीतसम्पद: कथं भूता: ?

८. कया सह उर्वशी अपहृता ?

९. चन्द्रकेतु: कस्य पुत्र: ?

१०. शङ्खचूड: कस्मिन् कुले जात: ?

2. **षण्णां वाक्यद्वयेन उत्तरं लिखत।** **12**

१. नीलकण्ठदीक्षितस्य शिवलीलार्णवे कस्य वर्णनं कथं कृतमस्ति ?

२. अट्टहासनाम कृपाण: कथम् आसीत् ?

३. चित्ररथेन आहूत: विक्रम: किमूचे ?

४. यदा मन्दाकिनी रथरश्मीन् जग्राह तदा गाङ्गेय: किमूचे ?

५. अप्सरस: कुत: उच्चै: चुक्रुशु: ?

६. धनमदान्धानां के गुरव: के च उपदेष्टार: ?

७. कीदृश: विग्रह: कं हन्ति ?

८. लवकुशौ वीक्ष्य राम: किमित्यचिन्तयत् ?

**3. त्रयाणां पञ्चषै: वाक्यै: उत्तरं लिखत ।** **9**

१. यशोवती कथं भूता आसीत् ?

२. "कन्याहरणे मम अपराध: नास्ति" इति भीष्म: कथम् उपपादितवान् ?

३. लक्ष्मी: क्षीरसागरात् कानि गृहीतवती ?

४. चन्द्रपूजनं कृत्वा काशीराजपुत्री राजानं किमुवाच ?

५. नायक: वनं कथं वर्णयति ?

**4. त्रयाणां ससन्दर्भं विवृणुत ।** **9**

१. शक्त एवाहं स्वयमेव सारथ्यं कर्तुं प्रहर्तुं च ।
२. न तितिक्षा सममस्ति साधनम्।
३. उपकृतं खलु दानवै: ।
४. स्वत: प्रकाशानि आवयो: अस्त्राणि।
५. अनाहतान्यपि मङ्गलतूर्याणि रेजुः।

**5. एकस्य पद्यस्य सान्वयमर्थं लिखत ।** **4**

१. सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिन:।
शरीरकस्यापि कृते मूढा: पापानि कुर्वते ॥

२. न कुलं न गृहं बान्धवा न च वर्णाश्रमयन्त्रणाऽपि न: ।
अवधूतपदे निषेदुषाम् अभिधा सिद्ध इति स्फुटैव ते ॥

**6. श्लोकद्वयं पूरयत ।** **6**

१. पापौघं ---------------------------- मह्यम् ॥
२. शान्त्याद्या: ------------------------ मह्यम् ॥
३. स्पृहणीय ---------------------------- समुन्नते:॥

7. **एकस्य कवे: देश-काल-कृति-वैशिष्ट्य-विषये लिखत ।** **4**

१. कालिदास: २. भारविः

8. **चतुर्णां रूपाणि परिचाययत ।** **4**

१. अभिभूय २. शतक्रतुना ३. आत्मानं

४. वर्त्म ५. जज्ञे ६. करवाम

9. **चत्वारि पदानि संस्कृतवाक्येषु योजयत ।** **4**

१. प्रणाय्य: २. विविक्ते ३. रय:

४. अविमृश्य ५. विनयप्रमाथी ६. क्ष्मा

10. **चतुर्णां पर्यायपदं लिखत ।** **4**

१. मृगलाञ्छन: २. कैवर्त: ३. कुम्भीलक:

४. भूधर: ५. अम्बरं ६. कुड्मल:

11. **चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत।** **6**

१. मदमुत्तम्भयितुं २. अप्यपहन्ति ३. मणेरतिनैष्ठुर्यं

४. वपुषागत्य ५. महदुपजनयति ६. सदैतदधिकृत्य

12. **चतुर्णाम् एकपदं लिखत ।** **4**

१. यागं कृतवान् २. गन्तुं इच्छा ३. चौर्येण अवाप्तं धनं

४. कुबेरस्य इयं ५. वक्षसि धृता माला ६. कुन्त्या: अपत्यं पुमान्

13. **चतुर्णां व्याकरणविशेषं लिखत ।** **8**

१. कुप्यन्ति हितवादिने २. विजयस्व ३. रोषमयं

४. भगवते रोचते ५. सन्तमसम् ६. अलमस्मै कर्मणे

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत।** **8**

| | | |
|---|---|---|
| १. वृक्षान्तरम् | २. पञ्चपात्रम् | ३. स्मयमानमुखाम्बुज: |
| ४. पार्वतीश: | ५. रथगजतुरगा: | ६. यथेच्छम् |

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत।** **6**

| | | |
|---|---|---|
| १. चकार | २. अभजत | ३. अगात् |

**16. चतुर्णां रिक्तस्थानानि पूरयत।** **4**

१. नरपालकराग्रवर्तिनं ------ विचकर्ष।

२. देवक्या: ------------इव सम्बभूव हर्ष:।

३. गुरुं विजेष्यसे---------- हि जामदग्न्य:।

४. खगाधिपस्य हृदयं --------मन्ये कृतम् ।

५. बाणभट्टस्य तनय: --------------------।

------------------------